हृत्कण्ठमूर्द्धोदरपार्श्वशूली क्षामाननः क्षीणबलस्वरौजाः । प्रसक्तवेगस्य समीरणेन कासेत्तु शुष्कं स्वरभेदयुक्तः । उरोविदाहज्वरवक्त्रशोषैरभ्यर्द्दितस्तिक्तमुखस्तृषार्त्तः । पित्तेन पीतानि वमेत्कटूनि कासेत्स पाण्डुः परिदह्यमानः । विलिप्यमानेन मुखेन सीदन् शिरोरुगार्त्तः कफपूर्णदेहः । अभक्तरुग्गौरवसादयुक्तः कासेद्भृशं सान्द्रकफः कफेन । वक्षोऽतिमात्रं विहतस्य यस्य व्यायामभाराध्ययनाभिघातैः । विश्लिष्टवक्षाः स नरः सरक्तं ष्ठीवत्यभीक्ष्णं क्षतजः स उक्तः । अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः । रूक्षस्योरः क्षतं वायुर्गृहीत्वा कासमावहेत् । स पूर्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम् । कण्ठेन रुजताऽत्यर्थं विभिन्नेनेव चोरसा । सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना । दुःखस्पर्शेन शूलेन भेदपीडाभितापिना । पर्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीडितः । पारावतइवाकूजन् कासवेगात् क्षतोद्भवात्” ।

**क्षतजव्रण** पु० भावप्र० उक्ते व्रणभेदे

“पृथक् समस्तदोषोत्था रक्तजागन्तुजौ तथा । व्रणशोथाः षडेते स्युः संयुक्ताः शोथलक्षणैः । (शोथलक्षणैः पूर्वोक्तैः) विशिष्टं रूपमाह । “विषमं पच्यते वातात् पित्तोत्थश्चाचिराच्चिरम् । कफजः पित्तवच्छोथो रक्तागन्तुसमुद्भवौ” । अत्र रक्तजेत्युक्तेः क्षतजव्रणइत्येव शब्दस्यौचित्यात् शब्दकल्पद्रुमे क्षतव्रणशब्दकल्पनं प्रामादिकम् भावप्र० उक्ते ५ पिपासाभेदे स्त्री यथा

“भयश्रमाभ्यां बलसंक्षयाद्वा ऊर्द्ध्वं चितं पित्तविवर्द्धनैश्च । पित्तं सवातं कुपितं नराणां तालु प्रपन्नं जनयेत् पिपासाम् । स्रोतःस्वपांवाहिषु दूषितेषु दोषैश्च तृट् सम्भवतीह जन्तोः । तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथान्याऽऽमसमुद्भवा च । भक्तोद्भवा सप्तमिकेति तासां निबोध लिङ्गान्यनुपूर्व्वशस्तु”। नराणां चितं स्वस्थान एव सञ्चितं पित्तं सवातं पित्तविवर्द्धनैः कट्वम्लोष्णादिभिः कुपितं भयश्रमाभ्यां बलसंक्षयादुपवासादेश्च वातः कुपितः । तदुद्वयम् ऊर्द्ध्वं प्रसरत् तालु प्रपन्नं सन् पिपासां जनयेत् । न केवलं तालुन्येव दूषिते तृष्णा भवति । किन्तु जलवाहिस्रोतःस्वपि अत आह स्रोतःस्वित्यादि । नन्वत्र बहुवचनं न युक्तम् । यतो जलवहे द्वे स्रोतसी सुश्रुतेनोक्ते । उच्यते । तयोरेवानेकप्रतानयोगान्न दोषः । अपांवाहिषु स्रोतःस्विति जिह्वादेरप्युपलक्षणम् यत आह चरकः “उदवाहिनीश्च धमनीर्जिह्वा हृदयगलतालु क्लोम च । संशोष्य नृणां देहेषु कुरुतस्तृष्णामतिप्रबलौ पित्तानिलाविति । संख्यामाह तिस्र इत्यादि । तृष्णायाः सामान्यलक्षणमाह । “सततं यः पिबेत्तोयं न तृप्तिमधिगच्छति । मुहुः काङ्क्षति तोयन्तु तं तृष्णार्त्तमादिशेत्” । क्षतजामाह “क्षतस्य रुक्शोणितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु” । क्षतस्य शस्त्रादिक्षतयुक्तस्य रुक् पीड़ा” ।

**क्षतविध्वंसिन्** पु० क्षतं विध्वंसयति वि+ध्वन्स-णिच्-णिनि ६त० । वृद्धदारकवृक्षे शब्दच०

**क्षतव्रत** पु० क्षतं व्रतमस्य । गृहीतव्रतत्यागिनि अवकीर्णिनि अमरः तत्प्रायश्चित्तमाह प्रायश्चित्तविवेके “अथावकीर्णिप्रायश्चित्तम् “अथावकीर्णी मैथुनेन क्षतव्रतः यथाह याज्ञवल्क्यः “अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम्” प्रायश्चित्तमाहाङ्गिराः “अवकीर्णं निवृत्तश्च ब्रह्महत्याव्रतञ्चरेत् । खरचर्म्मवासाः षण्मासांस्तथा मुच्येत किल्विषात्” । अवकीर्णमवकीर्णताभावे क्तः । अत्र सार्द्धसप्तधेनवः । इदं प्रमादकृतमन्ने एतद्विषय एव याज्ञवल्क्यः“अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम् । गर्द्दभं पशुमालभ्य नैरृतं स विशुद्ध्यति”। प्रयत्नात् स्त्रियमुत्साहय्य प्रवृत्ते तु मनुः “एतस्मिन्नेव संप्राप्ते वसित्वा गर्द्दभाजिनम् । सप्तागारांश्चरेद्भैक्ष्यं स्वकर्म्म परिकीर्त्तयन् । तेभ्यो लब्धेन भैक्ष्येण वर्त्तयन्नैककालिकम् । उपस्पृशंस्त्रिषवणमब्देन स विशुद्ध्यति” । एतद्विषयएवाभ्यासे शातातपः “अथातोऽवकीर्णिप्रायश्चित्तं व्याख्यास्यामः “ब्रह्मचारी यद्यवकीर्य्येत चतुर्थकालमब्दं भैक्ष्यं चरेदेवंपूतोभवतीति तथा पैठीनसिरपि “अवकीर्णी गर्द्दभाजिनं वसेत् संवत्सरं प्राजापत्यं चरेत्” शङ्खलिखिताभ्यान्तु विकल्प एवोक्तः । तद्यथा “सप्तरात्रं यावकीर्य्येत भैक्षाग्निकार्य्ये कुर्व्वन् सद्यः कामादुत्सर्गे रेतसोऽन्यत्र स्वप्नात् तत्र प्रायश्चित्तं महाव्याहृतिभिर्जुहुयात् ओङ्कारपूर्व्विकाभिः संवत्सरं वा नक्तं भैक्षञ्चरेत् चतुर्थकाले मितभुग्गायत्रीं तरत्समानुगाश्चपेदिति” । गायत्रीमपि संवत्सरं जपेदित्यर्थः । महाव्याहृतिहोमस्य लघुत्वादातिदेशिकावकीर्णित्वेन भैक्षाग्नित्यागे स्त्रियं विना कामात् सकृद्रेतस्त्यागे व्यवतिष्ठते, स्त्रियं विनापि कामाद्रेतस उत्सर्गे प्रमादगमने च वशिष्ठः“ब्रह्मचारी चेत् स्त्रियमुपेयादरण्ये